मार्कण्डेयपुराणम्/अध्यायः ०१६-०२०



Exported from Wikisource on २३ जनवरीमासः २०२४

16(16)

पितोवाच

कथितं मे त्वया वत्स संसारस्य व्यवस्थितम् ।
स्वरूपमतिहेयस्य घटीयन्त्रवदव्ययम् ॥१६.१ ॥

तदेवमेतदखिलं मयावगतमीदृशम् ।
किं मया वद कर्तव्यमेवस्मिन् व्यवस्थिते ॥१६.२ ॥

पुत्र उवाच

यदि मद्वचनं तात श्रद्दधास्यविशङ्कितः ।
तत् परित्यज्य गार्हस्थ्यं वानप्रस्थपरो भव ॥१६.३ ॥

तमनुष्ठाय विधिवद् विहायाग्निपरिग्रहम् ।
आत्मन्यात्मानमाधया निर्द्वन्द्वो निष्परिग्रहः ॥१६.४ ॥

एकान्तराशी वश्यात्मा भव भिक्षुरतन्द्रितः ।
तत्र योगापरो भूत्वा बाह्यस्पर्शविवर्जितः ॥१६.५ ॥

ततः प्राप्स्यति तं योगं दुःशसंयोगभेषजम् ।
मुक्तिहेतुमनौपम्यमनाख्येयमसङ्गिनम् ।
यत्संयोगान्न ते योगो भूयो भूतैर्भविष्यति ॥१६.६ ॥

पितोवाच

वत्स योगं ममाचक्ष्व मुक्तिहेतुमतः परम् ।
येन भूतैः पुनर्भूतो नेदृगः खमवाप्नुयाम् ॥१६.७ ॥

यत्रासक्तिपरस्यात्मा मम संसारबन्धनैः ।
नैति योगमयोगोऽपि तं योगमधुना वद ॥१६.८ ॥

संसारादित्यतापार्ति-विप्लुष्यद्देहमानसम् ।
ब्रह्मज्ञानाम्बुशीतेन सिञ्च मां वाक्यवारिणा ॥१६.९ ॥

अविद्याकृष्णसर्पेण दष्टं तद्विषपीडितम् ।

स्ववाक्यामृतपानेन मां जीवय पुनर्मृतम् ॥१६.१० ॥

पुत्र-दार-गृह-क्षेत्र-ममत्वनिगजडार्दितम् ।

मां मोचयेष्टसद्भाव-विज्ञानोद्घाटनैस्त्वरन् ॥१६.११ ॥

पुत्र उवाच

शृणु तात ! यथा योगो दत्तात्रेयेण धीमता ।

अलर्काय पुरा प्रोक्तः सम्यक् पृष्टेन विस्तरात् ॥१६.१२ ॥

पितोवाच

दत्तात्रेयः सुतः कस्य कथं वा योगमुक्तवान् ।

कश्चालर्को महाभागो यो यौगं परिपृष्टवान् ॥१६.१३ ॥

पुत्र उवाच

कौशिको ब्राह्मणः कश्चित् प्रतिष्ठानेऽभवत् पुरे ।
सोऽन्यजन्मकृतैः पापैः कुष्ठरोगातुरोऽभवत् ॥१६.१४ ॥

तं तथा व्याधितं भार्या पतिं देवमिवार्च्चयत् ।
पादाभ्यङ्गाङ्गसंवाह-स्त्रानाच्छादनभोजनैः ॥१६.१५ ॥

श्लेष्म-मूत्र-पुरीषासृक्-प्रवाहक्षालनेन च ।
रहश्चैवोपचारेण प्रियसम्भाषणेन च ॥१६.१६ ॥

स तया पूज्यमानोऽपि सदातीव विनीतया ।
अतीव तीव्रकोपत्वान्निर्भर्त्सयति निष्ठुरः ॥१६.१७ ॥

तथापि प्रणता भार्या तममन्यत दैवतम् ।
तं तथाप्यतिबीभत्सं सर्वश्रेष्ठममन्यत ॥१६.१८ ॥

अचङ्क्रमणशीलोऽपि स कदाचिद् द्विजोत्तमः ।
प्राह भार्यां नयस्वेति त्वं मां तस्या निवेशनम् ॥१६.१९॥

या सा वेश्या मया दृष्टा राजमार्गे गृहोषिता ।
तां मां प्रापय धर्मज्ञे ! सैव मे हृदि वर्तते ॥१६.२०॥

दृष्टा सूर्योदये बाला रात्रिश्चेयमुपागता ।
दर्शनानन्तरं सा मे हृदयान्नापसर्पति ॥१६.२१॥

यदि सा चारुसर्वाङ्गी पीनश्रोणिपयोधरा ।
नोपगूहति तन्वङ्गी तन्मां द्रक्षयसि वै मृतम् ॥१६.२२॥

वामः कामो मनुष्याणां बहुभिः प्रार्थ्यते च सा ।
ममाशक्तिश्च गमने सङ्कुलं प्रतिभाति मे ॥१६.२३॥

तत् तदा वचनं श्रुत्वा भर्तुः कामातुरस्य सा ।
तत्पत्नी सत्कुलोत्पन्ना महाभागा पतिव्रता ॥१६.२४॥

गागं् परिकरं बद्ध्वा शुल्कमादाय चाधिकम् ।
स्कन्धे भर्तारमादाय जगाम मृदुगामिनी ॥१६.२५ ॥

निशि मेघास्तृते व्योम्नि चलद्विद्युत्प्रदर्शिते ।
राजमार्गे प्रियं भर्तुश्चिकीर्षन्ती द्विजाङ्गना ॥१६.२६ ॥

पथि शूले तथा प्रोतमचौरं यौरशङ्कया ।
माण्डव्यमतिदुःखार्तमन्धकारेऽथ स द्विजः ॥१६.२७ ॥

पत्नीस्कन्धे समारूढश्चालयामास कौशिकः ।
पादावमर्षणात् क्रुद्धो माण्डव्यस्तमुवाच ह ॥१६.२८ ॥

येनाहमेवमत्यर्थं दुःखितश्चालितः पदा ।
दशां कष्टामनुप्राप्तः स पापात्मा नराधमः ॥१६.२९ ॥

सूर्योदयेऽवशः प्राणैर्विमोक्षयति न संशयः ।

भास्करालोकनादेव स विनाशमवाप्स्यति ॥१६.३० ॥

तस्य भार्याततः श्रुत्वा तं शापमतिदारुणम् ।
प्रोवाच व्यथिता सूर्यो नैवोदयमुपैष्यति ॥१६.३१ ॥

ततः सूर्योदयाभावादभवत् सन्तता निशा ।
बहून्यहः प्रमाणानि ततो देवा भयं ययुः ॥१६.३२ ॥

निः स्वाध्यायवषट्कार-स्वधास्वाहाविवर्जितम् ।
कथं नु खल्विदं सर्वं न गच्छेत् संक्षयं जगत् ॥१६.३३ ॥

अहोरात्रव्यवस्थाया विना मासर्तुसंक्षयः ।
तत्संक्षयान्न त्वयने ज्ञायेते दक्षिणोत्तरे ॥१६.३४ ॥

विना चायनविज्ञानात् कालः संवत्सरः कुतः ।
संवत्सरं विना नान्यत् कालज्ञानं प्रवर्तते ॥१६.३५ ॥

पतिव्रताया वचसा नोद्गच्छति दिवाकरः ।
सूर्योदयं विना नैव स्त्रानदानादिकाः क्रियाः ॥१६.३६ ॥

नाग्नेर्विहरणञ्चैव क्रात्वभावश्च लक्षयते ।
नैवाप्ययनमस्माकं विना होमेन जायते ॥१६.३७ ॥

वयमाप्यायिता मर्त्यैर्यज्ञभागैर्यथोचितैः ।
वृष्ट्याताननुगृह्णीमो मर्त्यान् शस्यादिसिद्धये ॥१६.३८ ॥

निष्पादितास्वोषधीषु मर्त्या यज्ञैर्यजन्ति नः ।
तेषां वयं प्रयच्छामः कामान् यज्ञादिपूजिताः ॥१६.३९ ॥

अधो हि वर्षाम वयं मर्त्याश्चोर्ध्वप्रवर्षिणः ।
तोयवर्षेण हि वयं हविर्वर्षेण मानवाः ॥१६.४० ॥

ये नास्माकं प्रयच्छन्ति नित्यनैमित्तकीः क्रियाः ।
क्रतुभागं दुरात्मानः स्वयञ्चाश्नन्ति लोलुपाः ॥१६.४१ ॥

विनाशाय वयं तेषां तोयसूर्याग्निमारुतान् ।
क्षितिञ्च सन्दूषयामः पापानामपकारिणाम् ॥१६.४२ ॥

दुष्टतोयादिभोगेन तेषां दुष्कृतकर्मिणाम् ।
उपसर्गाः प्रवर्तन्ते मरणाय सुदारुणाः ॥१६.४३ ॥

ये त्वस्मान् प्रीणयित्वा तु भुञ्जते शेषमात्मना ।
तेषां पुण्यान् वयं योकान् विदधाम महात्मनाम् ॥१६.४४ ॥

तन्नास्ति सर्वमेवैतद्विनैषां व्युष्टिसंस्थैतम् ।
कथं नु दिनसर्गः स्यादन्योऽन्यमवदन् सुराः ॥१६.४५ ॥

तेषामेव समेतानां यज्ञव्युच्छित्तिशङ्किनाम् ।
देवानां वचनं श्रुत्वा प्राह देवः प्रजापतिः ॥१६.४६ ॥

तेजः परं तेजसैव तपसा च तपस्तथा ।

प्रशाम्यतेऽमरास्तस्माच्छृणुध्वं वचनं मम ॥१६.४७ ॥

पतिव्रताया माहात्म्यान्नोद्गच्छति दिवाकरः ।
तस्य चानुदयाद्धानिर्मर्त्यानां भवतां तथा ॥१६.४८ ॥

तस्मात् पतिव्रतामत्रेरनुभूयां तपस्विनीम् ।
प्रसादयत वै पत्नीं भानोरुदयकाम्यया ॥१६.४९ ॥

पुत्र उवाच

तैः सा प्रसादिता गत्वा प्रोहेष्टं व्रियतामिति ।
अयाचन्त दिनं देवा भवत्विति यथा पुरा ॥१६.५० ॥

अनसूयोवाच

पतिव्रताया माहात्म्यं न हीयेत कथन्त्विति ।
संमान्य तस्मात् तां साध्वीमहः स्त्रक्षयाम्यहं सुराः ॥१६.५१ ॥

यथा पुनरहोरात्र-संस्थानमुपजायते ।
यथा च तस्याः स्वपतिर्न साध्व्या नाशमेष्यति ॥१६.५२ ॥

पुत्र उवाच

एवमुक्त्वा सुरांस्तस्या गत्वा सा मन्दिरं शुभा ।
उवाच कुशलं पृष्टा धर्मं भर्तुस्तथात्मनः ॥१६.५३ ॥

अनसूयोवाच

कच्चिन्नन्दसि कल्याणि स्वभर्तुर्मुखदर्शनात् ।
कच्चिच्चाखिलदेवेभ्यो मन्यसेऽभ्यधिकं पतिम् ॥१६.५४ ॥

भर्तृशुश्रूषणादेव मया प्राप्तं महत् फलम् ।
सर्वकामफलावाप्त्या प्रत्यूहाः परिवर्तिताः ॥१६.५५ ॥

पञ्चवर्णानि मनुष्येण साध्वि ! देयानि सर्वदा ।
तथात्मवर्णधर्मेण कर्तव्यो धनसंचयः ॥१६.५६ ॥

प्राप्तश्चार्थस्ततः पात्रे विनियोज्यो विधानतः ।
सत्यार्जव-तपो-दानैर्दयायुक्तो भवेत् सदा ॥१६.५७ ॥

क्रियाश्च शास्त्रनिर्दिष्टा रागद्वेषविवर्जिताः ।
कर्तव्या अन्वहं श्रद्धा-पुरस्कारेण शक्तितः ॥१६.५८ ॥

स्वजातिविहितानेव लोकानाप्नोति मानवः ।
क्लेशेन महता साध्वि ! प्राजापत्यादिकान् क्रमात् ॥१६.५९ ॥

स्त्रियस्त्वेवं समस्तस्य नरैर्दुःखार्जितस्य वै ।
पुण्यस्यार्धापहारिण्यः पतिशुश्रूषयैव हि ॥१६.६० ॥

नास्ति स्त्रीणां पृथग्यज्ञो न श्राद्धं नाप्युपोषितम् ।
भर्तृशुश्रूषयैवैतान् लोकानिष्टान् व्रजन्ति हि ॥१६.६१ ॥

तस्मात् साध्वि ! महाभागे ! पतिशुश्रूषणं प्रति ।
त्वया मतिः सदा कार्या यतो भर्ता परा गतिः ॥१६.६२ ॥

यद्देवेभ्यो यच्च पित्रागतेभ्यः कुर्याद्भर्ताभ्यर्च्चनं सत्क्रियातः ।
तस्याप्यर्धं केवलानन्यचित्ता नारी भुङ्क्ते भर्तृशुश्रूषयैव ॥१६.६३ ॥

पुत्र उवाच

तस्यास्तद्वचनं श्रुत्वा प्रतिपूज्य तथादरात् ।
प्रत्युवाचात्रिपत्नीं तामनसूयामिदं वचः ॥१६.६४ ॥

धन्यास्म्यनुगृहीतास्मि देवैश्चाप्यवलोकिता ।
यन्मे प्रकृतिकल्याणि ! श्रद्धां वर्धयसे पुनः ॥१६.६५ ॥

जानाम्येतन्न नारीणां काचित् पतिसमा गतिः ।
तत्प्रीतिश्चोपकाराय इह लोके परत्र च ॥१६.६६ ॥

पतिप्रसादादिह च प्रेत्य चैव यशस्विनि ।
नारी सुखमवाप्नोति नार्या भर्ता हि देवता ॥१६.६७ ॥

सा त्वं ब्रूहि महाभागे ! प्राप्ताया मम मन्दिरम् ।
आर्याया यन्मया कार्यं तथार्येणापि वा शुभे ॥१६.६८ ॥

अनसूयोवाच

एते देवाः सहेन्द्रेण मामुपागम्य दुः खिताः ।
त्वद्वाख्यापास्तसत्कर्मदिननक्तनिरूपणाः ॥१६.६९ ॥

याचन्तेऽहर्निशासंस्थां यथावदविखण्डिताम् ।
अहं तदर्थमायाता शृणु चैतद्वचो मम ॥१६.७० ॥

दिनाभावात् समस्तानामभावो यागकर्मणाम् ।
तदभावात् सुराः पुष्टिं नोपयान्ति तपस्विनि ॥१६.७१ ॥

अह्नश्चैव समुच्छेदादुच्छेदः सर्वकर्मणाम् ।
तदुच्छेदादनावृष्ट्या जगदुच्छेदमेष्यति ॥१६.७२ ॥

तत् त्वमिच्छसि चेदेतत् जगदुद्धर्तुमापदः ।
प्रसीद साध्वि ! लोकानां पूर्ववद्धर्ततां रविः ॥१६.७३ ॥

ब्राह्मण्युवाच

माण्डव्येन महाभागे ! शप्तो भर्ता ममेश्वरः ।
सूर्योदये विनाशं त्वं प्राप्स्यसीत्यतिमन्युना ॥१६.७४ ॥

अनसूयोवाच

यदि वा रोचते भद्रे ! ततस्त्वद्वचनादहम् ।
करोमि पूर्ववद्देहं भर्तारञ्च नवं तव ॥१६.७५ ॥

मया हि सर्वथा स्त्रीणां माहात्म्यं वरवर्णिनि ।

पतिव्रतानामाराध्यमिति संमानयामि ते ॥१६.७६ ॥

पुत्र उवाच

तथेत्युक्ते तया सूर्यमाजुहाव तपस्विनी ।

अनसूयार्घ्यमुद्यम्य दशरात्रे तदा निशि ॥१६.७७ ॥

ततो विवस्वान् भगवान् फुल्लपद्मारुणाकृतिः ।

शैलराजानमुदयमारुरोहोरुमण्डलः ॥१६.७८ ॥

समनन्तरमेवास्या भर्ता प्राणैर्व्ययुज्यत ।

पपात च महीपृष्ठे पतन्तं जगृहे च सा ॥१६.७९ ॥

अनसूयोवाच

न विषादस्त्वया भद्रे ! कर्तव्यः पश्य मे बलम् ।

पतिशुश्रूषयावाप्तं तपसः किं चिरेण ते ॥१६.८० ॥

यथा भर्तृसमं नान्यमपश्यं पुरुषं क्वचित् ।
रूपतः शीलतो बुद्ध्या वाङ्माधुर्य्यादिभूषणैः ॥१६.८१ ॥

तेन सत्येन विप्रोऽयं व्याधिमुक्तः पुनर्युवा ।
प्राप्नोतु जीवितं भार्यासहायः शरदां शतम् ॥१६.८२ ॥

यथा भर्तृसमं नान्यमहं पश्यामि दैवतम् ।
तेन सत्येन विप्रोऽयं पुनर्जीवत्वनामयः ॥१६.८३ ॥

कर्मणा मनसा वाचा भर्तुराराधनं प्रति ।
यथा ममोद्यमो नित्यं तथायं जीवतां द्विजः ॥१६.८४ ॥

पुत्र उवाच

ततो विप्रः समुत्तस्थौ व्याधिमुक्तः पुनर्युवा ।

स्वभाभिर्भासयन् वेश्म वृन्दारक इवाजरः ॥१६.८५ ॥

ततोऽपतत् पुष्पवृष्टिर्देववाद्यादिनिस्वनः ।
लेभिरे च मुदं देवा अनसूयामथाब्रुवन् ॥१६.८६ ॥

देवा ऊचुः

वरं वृणीष्व कल्याणि देवकार्यं महत् कृतम् ।
त्वया यस्मात् ततो देवा वरदास्ते तपस्विनि ॥१६.८७ ॥

अनसूयोवाच

यदि देवाः प्रसन्ना मे पितामहपुरोगमाः ।
वरदा वरयोग्या च यद्यहं भवतां मता ॥१६.८८ ॥

तद्यान्तु मम पुत्रत्वं ब्रह्म-विष्णु-महेश्वराः ।
योगञ्च प्राप्नुयां भर्तृसहिता क्लेशमुक्तये ॥१६.८९ ॥

एवमस्त्विति तां देवा ब्रह्म-विष्णु-शिवादयः ।
प्रोक्ता जग्मुर्यथान्यायमनुमान्य तपस्विनीम् ॥१६.९० ॥

इति श्रीमार्कण्डेयपुराणे पितापुत्रसंवादे अनसूयावरप्राप्तिर्नाम षोडशोऽध्यायः

17(16)

सप्तदशोऽध्यायः

पुत्र उवाच

ततः काले बहुतिथे द्वितीयो ब्रह्मणः सुतः ।
स्वभार्यां भगवानत्रिरनसूयामपश्यत ॥१७.१ ॥

ऋतुस्नातां सुचार्वङ्गीं लोभनीयोत्तमाकृतिम् ।
सकामो मनसा भेजे स मुनिस्तामनिन्दिताम् ॥१७.२ ॥

तस्याभिध्यायतस्तान्तु विकारो योऽन्वजायत ।
तमेवोवाह पवनस्तिरश्चोर्ध्वञ्च वेगवान् ॥१७.३ ॥

ब्रह्मरूपञ्च शुक्लाभं पतमानं समन्ततः ।
सोमरूपं रजोपेतं दिशस्तं जगृहुर्दश ॥१७.४ ॥

स सोमो मानसो जज्ञे तस्यामत्रेः प्रजापतेः ।
पुत्रः समस्तसत्त्वानामायुराधार एव च ॥१७.५ ॥

तुष्टेन विष्णुना जज्ञे दत्तात्रेयो महात्मना ।
स्वशरीरात् समुत्पाद्य सत्त्वोद्रिक्तो द्विजोत्तमः ॥१७.६ ॥

दत्तात्रेय इति ख्यातः सोऽनसूयास्तनं पपौ ।
विष्णुरेवावतीर्णोऽसौ द्वितीयोऽत्रेः सुतोऽभवत् ॥१७.७ ॥

सप्ताहात् प्रच्युतो मातुरुदरात् कुपितो यतः ।
हैहयेन्द्रमुपावृत्तमपराध्यन्तमुद्धतम् ॥१७.८ ॥

दृष्ट्वात्रौ कुपितः सद्यो दग्धुकामः स हैहयम् ।
गर्भवासमहायास-दुःखामर्षसमन्वितः ॥१७.९ ॥

दुर्वासास्तमसोद्रिक्तो रुद्रांशः समजायत ।
इति पुत्रत्रयं तस्या जज्ञे ब्रह्मेशवैष्णवम् ॥१७.१० ॥

सोमो ब्रह्माभवद्विष्णुर्दत्तात्रेयो व्यजायत ।
दुर्वासाः शङ्करो जज्ञे वरदानाद्दिवौकसाम् ॥१७.११ ॥

सोमः स्वरश्मिभैः शीतैर्वीरुधौषधिमानवान् ।
आप्याययन् सदा स्वर्गे वर्तते स प्रजापतिः ॥१७.१२ ॥

दत्तात्रेयः प्रजां पाति दुष्टदैत्यनिबर्हणात् ।

शिष्टानुग्‌रहकृच्चेति ज्ञेयश्चांशः स वैष्णवः ॥१७.१३ ॥

निर्दहत्यवमन्तारं दुर्वासा भगवानजः ।
रौद्‌रं समाश्‌रित्य वपुर्दृङ्मनोवाग्भिरुद्धतः ॥१७.१४ ॥

सोमत्वं भगवानत्‌रैः पुनश्चक्‌रे प्‌रजापतिः ।
दत्तात्‌रेयोऽपि विषयान् योगास्थो बुभुजे हरिः ॥१७.१५ ॥

दुर्वासाः पितरं हित्वा मातरञ्चोत्तम व्‌रतम् ।
उन्मत्ताख्यं समाश्‌रित्य परिबभ्‌राम मेदिनीम् ॥१७.१६ ॥

मुनिपुत्‌रवृतो योगी दत्तात्‌रेयोऽप्यसङ्गिताम् ।
अभीप्स्यमानः सरसि निममज्ज चिरं प्‌रभुः ॥१७.१७ ॥

तथापि तं महात्मानमतीव प्‌रियदर्शनम् ।
तत्यजुर्न कुमारास्ते सरसस्तीरमाश्‌रिताः ॥१७.१८ ॥

दिव्ये वर्षशते पूर्णे यदा ते न त्यजन्ति तम् ।
तत्प्रीत्या सरसस्तीरं सर्वे मुनिकुमारकाः ॥१७.१९ ॥

ततो दिव्याम्बरधरां चारुपीननितम्बिनीम् ।
नारीमादाय कल्याणीमुत्तितार जलान्मुनिः ॥१७.२० ॥

स्त्रीसन्निकर्षाद्यद्येते परित्यक्षयन्ति मामिति ।
मुनिपुत्रास्ततोऽसङ्गी स्थास्यामीति विचिन्तयन् ॥१७.२१ ॥

तथापि तं मुनिसुता न त्यजन्ति यदा मुनिम् ।
ततः सह तया नार्या मद्यपानमथापिबत् ॥१७.२२ ॥

सुरापानरतं ते न सभार्यं तत्यजुस्ततः ।
गीतवाद्यादिवनिता-भोगसंसर्गदूषितम् ॥१७.२३ ॥

मन्यमाना महात्मानं पीतासव-सविक्रियम् ।
नावाप दोषं योगीशो वारुणीं स पिबन्नपि ॥१७.२४ ॥

अन्तावसायिवेश्मान्तर्मातरिश्वा वसन्निव ।

सुरां पिबन् सपत्नीकस्तपस्तेपे स योगवित् ।

योगीश्वारश्चिन्त्यमानो योगिभिर्मुक्तिकाङ्क्षिभिः ॥१७.२५ ॥

इति श्रीमार्कण्डेपुराणे पितापुत्रसंवादे दत्तात्रेयोत्पत्तिर्नाम सप्तदशोऽध्यायः

18(16)

अष्टादशोऽध्यायः

पुत्र उवाच

कस्यचित्त्वथ कालस्य कृतवीर्यात्मजोर्ऽजुनः ।

कृतवीर्ये दिवं याते मन्त्रिभिः सपुरोहितैः ॥१८.१ ॥

पौरैश्चात्माभिषेकार्थं समाहूतोऽब्रवीदिदम् ।
नाहं राज्यं करिष्यामि मन्त्रिणो नरकोत्तरम् ॥१८.२ ॥

यदर्थं गृह्यते शुल्कं तदनिष्पादयन् वृथा ।
पण्यानां द्वादशं भागं भूपालाय वणिग्जनः ॥१८.३ ॥

दत्त्वार्थरक्षिभिर्मार्गे रक्षितो याति दस्युतः ।
गोपाश्च घृततक्रादेः षड्भागञ्च कृषीबलाः ॥१८.४ ॥

दत्त्वान्यद्भूभुजे दद्युर्यदि भागं ततोऽधिकम् ।
पण्यादीनामशेषाणां वणिजो गृह्णतस्ततः ॥१८.५ ॥

इष्टापूर्तविनाशाय तद्राज्ञश्चौरधर्मिणः ।
यद्यन्यैः पाल्यते लोकस्तद्वृत्तयन्तरसंश्रितैः ॥१८.६ ॥

गृह्णतो बलिषड्भागं नृपतेर्नरको ध्रुवम् ।

निरूपितमिदं राज्ञः पूर्वं रक्षणवेतनम् ॥१८.७ ॥

अरक्षंश्चौरतश्चौर्यं तदेनो नृपतेर्भवेत् ।
तस्माद्यदि तपस्तप्त्वा प्राप्तो योगित्वमीप्सितम् ॥१८.८ ॥

भुवः पालनसामर्थ्य-युक्त एको महीपतिः ।
पृथिव्यां शस्त्रधृङ्मान्यस्त्वहमेवर्धिसंयुतः ।
ततो भविष्ये नात्मानं करिष्ये पापभागिनम् ॥१८.९ ॥

पुत्र उवाच

तस्य तन्निश्चयं ज्ञात्वा मन्त्रिमध्यस्थितोऽब्रवीत् ।
गर्गो नाम महाबुद्धिर्मुनिश्रेष्ठो वयोऽतिगः ॥१८.१० ॥

यद्येवं कर्तुकामस्त्वं राज्यं सम्यक् प्रशासितुम् ।
ततो शृणुष्व मे वाक्यं कुरुष्व च नृपात्मज ॥१८.११ ॥

दत्तात्रेयं महाभागं सह्यद्रोणीकृताश्रयम् ।
तमाराधय भूपाल ! पाति यो भुवनत्रयम् ॥१८.१२ ॥

योगयुक्तं महाभागं सर्वत्र समदर्शिनम् ।
विष्णोरंशं जगद्धातुरवतीर्णं महीतले ॥१८.१३ ॥

यमाराध्य सहस्राक्षः प्राप्तवान् पदमात्मनः ।
हृतं दुरात्मभिर्दैत्यैर्जघान च दितेः सुतान् ॥१८.१४ ॥

अर्जुन उवाच

कथमाराधितो देवैर्दत्तात्रेयः प्रतापवान् ।
कथञ्चापहृतं दैत्यैरिन्द्रत्वं प्राप वासवः ॥१८.१५ ॥

गर्ग उवाच

देवानां दानवानाञ्च युद्धमासीत् सुदारुणम् ।
दैत्यानामीश्वरो जम्भो देवानाञ्च शचीपतिः ॥१८.१६ ॥

तेषाञ्च युध्यमानानां दिव्यः संवत्सरो गतः ।
ततो देवाः पराभूता दैत्या विजयिनोऽभवन् ॥१८.१७ ॥

विप्रचित्तिमुखैर्देवा दानवैस्ते पराजिताः ।
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥१८.१८ ॥

बृहस्पतिमुपागम्य दैत्यसैन्यवधेप्सवः ।
अमन्त्रयन्त सहिता बालखिल्यैस्तथर्षिभिः ॥१८.१९ ॥

बृहस्पतिरुवाच

दत्तात्रेयं महात्मानमत्रेः पुत्रं तपोधनम् ।
विकृताचरणं भक्त्या सन्तोषयितुमर्हथ ॥१८.२० ॥

स वो दैत्यविनाशाय वरदो दास्यते वरम् ।
ततो हनिष्यथ सुरा सहिता दैत्यदानवान् ॥१८.२१ ॥

गर्ग उवाच

इत्युक्तास्ते तदा जग्मुर्दत्तात्रेयाश्रमं सुराः ।
ददृशुश्च महात्मानं तं ते लक्ष्म्या समन्वितम् ॥१८.२२ ॥

उद्गीयमानं गन्धर्वैः सुरापानरतं मुनिम् ।
ते तस्य गत्वा प्रणतिमवदन् साध्यसाधनम् ॥१८.२३ ॥

चक्रुः स्तवञ्चोपजह्रुर्भक्ष्यभोज्यस्त्रगादिकम् ।

तिष्ठन्तमनुतिष्ठन्ति यान्तं यान्ति दिवौकसः ॥१८.२४ ॥

आराधयामासुरधः स्थितास्तिष्ठन्तमासने ।
स प्राह प्रणतान् देवान् दत्तात्रेयः किमिष्यते ।
मत्तो भवद्भिर्येनेयं शुश्रूषा क्रियते मम ॥१८.२५ ॥

देवा ऊचुः

दानवैर्मुनिशार्दूल ! जम्भाद्यैर्भूर्भुवादिकम् ।
हृतं त्रैलोक्यमाक्रम्य क्रतुभागाश्च कृत्स्नशः ॥१८.२६ ॥

तद्वधे कुरु बुद्धिं त्वं परित्राणाय नोऽनघ ।
त्वत्प्रसादादभीप्सामः पुनः प्राप्तं त्रिविष्टपम् ॥१८.२७ ॥

दत्तात्रेय उवाच

मद्यासक्तोऽहमुच्छिष्टो न चैवाहं जितेन्द्रियः ।

कथमिच्छथ मत्तोऽपि देवाः शत्रुपराभवम् ॥१८.२८ ॥

देवा ऊचुः

अनघस्त्वं जगन्नाथ न लेपस्तव विद्यते ।
विद्याक्षालनशुद्धान्तर्निविष्टज्ञानदीधिते !॥१८.२९ ॥

दत्तात्रेय उवाच

सत्यमेतत् सुरा विद्या ममास्ति समदर्शिनः ।
अस्यास्तु योषितः सङ्गादहमुच्छिष्टतां गतः ॥१८.३० ॥

स्त्रीसम्भोगो हि दोषाय सातत्येनोपसेवितः ।
एवमुक्तास्ततो देवाः पुनर्वचनमब्रुवन् ॥१८.३१ ॥

देवा ऊचुः

अनघेयं द्विजश्रेष्ठ जगन्माता न दुष्यते ।
यथांशुमाला सूर्यस्य द्विज-चाण्डालसङ्गिनी ॥१८.३२ ॥

गर्ग उवाच

एवमुक्तस्ततो देवैर्दत्तात्रेयोऽब्रवीदिदम् ।
प्रहस्य त्रिदशान् सर्वान् यद्येतद्भवतां मतम् ॥१८.३३ ॥

तदाहूयासुरान् सर्वान् युद्धाय सुरसत्तमाः ।
इहानयत मद्दृष्टिगोचरं मा विलम्बतः ॥१८.३४ ॥

मद्दृष्टिपातहुतभुक्-प्रक्षीणबलतेजसः ।
येन नाशमशेषास्ते प्रयान्ति मम दर्शनात् ॥१८.३५ ॥

गर्ग उवाच

तस्य तद्वचनं श्रुत्वा देवैर्दैत्या महाबलाः ।
आहवाय समाहूता जग्मुर्देवगणान् रुषा ॥१८.३६ ॥

ते हन्यमाना दैतेयैर्देवा शीघ्रं भयातुराः ।
दत्तात्रेयाश्रमं जग्मुः समेताः शरणार्थिनः ॥१८.३७ ॥

तमेव विविशुर्दैत्याः कालयन्तो दिवौकसः ।
ददृशुश्च महात्मानं दत्तात्रेयं महाबलम् ॥१८.३८ ॥

वामपार्श्वस्थितामिष्टामशेषजगतां शुभाम् ।

भार्याञ्चास्य सुचार्वङ्गीं लक्ष्मीमिन्दुनिभाननाम् ॥१८.३९ ॥

नीलोत्पलाभनयनां पीनश्रोणिपयोधराम् ।
गदन्तीं मधुरां भाषां सर्वैर्योषिद्गुणैर्युताम् ॥१८.४० ॥

ते तां दृष्ट्वाग्रतो दैत्याः साभिलाषा मनोभवम् ।
न शेसुरुद्धतं धैर्यान्मनसा वोढुमातुराः ॥१८.४१ ॥

त्यक्त्वा देवान् स्त्रियं तां तु हर्तुकामा हतौजसः ।
तेन पापेन मुह्यन्तः संशक्तास्ते ततोऽब्रुवन् ॥१८.४२ ॥

स्त्रीरत्नमेतत् त्रैलोक्ये सारं नो यदि वै भवेत् ।
कृतकृत्यास्ततः सर्व इति नो भावितं मनः ॥१८.४३ ॥

तस्मात् सर्वे समुत्क्षिप्य शिविकायां सुरार्दनाः ।
आरोप्य स्वमधिष्ठानं नयाम इति निश्चिताः ॥१८.४४ ॥

गर्ग उवाच

सानुरागास्ततस्ते तु प्रोक्ताश्चेत्त्थं परस्परम् ।

तस्य तां योषितं साध्वीं समुत्क्षिप्य स्मरार्दिताः ॥१८.४५ ॥

शिविकायां समारोप्य सहिता दैत्यदानवाः ।

शिरः सु शिविकां कृत्वा स्वस्थानाभिमुखं ययुः ॥१८.४६ ॥

दत्तात्रेयस्ततो देवान् विहस्येदमथाब्रवीत् ।

दिष्ट्या वर्धथ दैत्यानामेषा लक्ष्मीः शिरोगता ।

सप्त सथानान्यतिक्रान्ता नवमन्यमुपैष्यति ॥१८.४७ ॥

देवा ऊचुः

कथयस्व जगन्नाथ ! केषु स्थानेष्वस्थिता ।

पुरुषस्य फलं किं वा प्रयच्छत्यथ नश्यति ॥१८.४८ ॥

दत्तात्रेय उवाच

नृणां पदे स्थिता लक्ष्मीर्निलयं सम्प्रयच्छति ।
सक्थ्न्योश्च संस्थिता वस्त्रं तथा नानाविधं वसु ॥१८.४९ ॥

कलात्रञ्च गुह्यसंस्था क्रोडस्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ॥१८.५० ॥

लक्ष्मीर्लक्ष्मीवतां श्रेष्ठा कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारैश्च तथाश्लेषं प्रवासिभिः ॥१८.५१ ॥

सृष्टानुवाक्यलावण्यमाज्ञामवितथां तथा ।
मुखसंस्था कवित्वञ्च यच्छत्युदधिसम्भवा ॥१८.५२ ॥

शिरोगता सन्त्यजति ततोऽन्यं याति चाश्रयम् ।
सेयं शिरोगता चैतान् परित्यक्षयति साम्प्रतम् ॥१८.५३ ॥

प्रगृह्यास्त्राणि बध्यन्तां तस्मादेते सुरारयः ।
न भेतव्यं भृशञ्चैते मया निस्तेजसः कृताः ।
परदारावमर्षाच्च दग्धपुण्या हतौजसः ॥१८.५४ ॥

ततस्ते विविधैरस्त्रैर्वध्यमानाः सुरारयः ।
मूर्ध्नि लक्ष्म्या समाक्रान्ता विनेशुरिति नः श्रुतम् ॥१८.५५ ॥

लक्ष्मीश्चोत्पत्य सम्प्राप्ता दत्तात्रेयं महामुनिम् ।
स्तूयमाना सुरैः सर्वैर्दैत्यनाशान्मुदान्वितैः ॥१८.५६ ॥

प्रणिपत्य ततो देवा दत्तात्रेयं मनीषिणम् ।
नाकपृष्ठमनुप्राप्ता यथापूर्वं गतज्वराः ॥१८.५७ ॥

तथा त्वमपि रोजेन्द्र ! यदीच्छसि यथेप्सितम् ।

प्राप्तुमैश्वर्यमतुलं तूर्णमाराधयस्व ताम् ॥१८.५८ ॥

इति श्रीमार्कण्डेयपुराणेठगर्गवाक्यम्ऽ नामाष्टादशोऽध्यायः

19(17)

एकोनविंशोऽध्यायः

पुत्र उवाच

इत्यृषेर्वचनं श्रुत्वा कार्तवीर्यो नरेश्वरः ।
दत्तात्रेयाश्रमं गत्वा तं भक्त्या समपूजयत् ॥१९.१ ॥

पादसंवाहनाद्येन मध्वाद्याहरणेन च ।
स्त्रक्चन्दनादिगन्धाम्बु-फलाद्यनयनेन च ॥१९.२ ॥

तथान्नसाधनैस्तस्य उच्छिष्टापोहनेन च ।

परितुष्टो मुनिर्भूतं तमुवाच तथैव सः ॥१९.३ ॥

यथैवोक्ताः पुरा देवा मद्यभोगादिकुत्सनम् ।
स्त्री चेयं मम पार्श्वस्थेत्येतद्भोगाच्च कुत्सितम् ॥१९.४ ॥

सदैवाहं न मामेवमुपरोद्धुं त्वमर्हसि ।
अशक्तमुपकाराय शक्तमाराधयस्व भोः ॥१९.५ ॥

जड उवाच

तेनैवमुक्तो मुनिना स्मृत्वा गर्गवचश्च तत् ।
प्रत्युवाच प्रणम्यैनं सार्तवीर्यार्जुनस्तदा ॥१९.६ ॥

अर्जुन उवाच

किं मां मोहयसे देव ! स्वां मायां समुपाश्रितः ।
अनघस्त्वं तथैवेयं देवी सर्वभवारणिः ॥१९.७ ॥

इत्युक्तः प्रीतिमान् देवस्ततस्तं प्रत्युवाच ह ।
कार्तवीर्यं महाभागं वशीकृतमहीतलम् ॥१९.८ ॥

वरं वृणीष्व गुह्यं मे यत् त्वया समुदीरितम् ।
तेन तुष्टिः परा जाता त्वय्यद्य मम पार्थिव ॥१९.९ ॥

ये च मां पूजयिष्यन्ति गन्धमाल्यादिभिर्नराः ।
मांसमद्योपहारैश्च मिष्टान्नैश्चाज्यसंयुतैः ॥१९.१० ॥

लक्ष्मीसमेतं गीतैश्च ब्राह्मणानां तथार्च्चनैः ।
वाद्यैर्मनोरमैर्वोणा-वेणु-शङ्खादिभिस्तथा ॥१९.११ ॥

तेषामहं परां तुष्टिं पुत्रदारधनादिकम् ।
प्रदास्याम्यवघातञ्च हनिष्याम्यवमन्यताम् ॥१९.१२ ॥

स त्वं वरय भद्रं ते वरं यन्मसेप्सितम् ।
प्रसादसुमुखस्तेऽहं गुह्यनामप्रकीर्तनात् ॥१९.१३ ॥

कार्तवीर्य उवाच

यदि देव प्रसन्नस्त्वं तत् प्रयच्छर्धिमुत्तमाम् ।
यया प्रजाः पालयेऽहं न चाधर्ममवाप्नुयाम् ॥१९.१४ ॥

परानुसरणे ज्ञानमप्रतिद्वन्द्वतां रणे ।
सहस्रमाप्तुमिच्छामि बाहूनां लघुतागुणम् ॥१९.१५ ॥

असङ्गा गतयः सन्तु शैलाकाशाम्बु-भूमिषु ।
पातालेषु च सर्वेषु वधश्चाप्यधिकान्नरात् ॥१९.१६ ॥

तथोन्मार्गप्रवृत्तस्य चास्तु सन्मार्गदेशकः ।

सन्तु मेऽतिथयः श्लाघ्या वित्तदाने तथाक्षये ॥१९.१७ ॥

अनष्टद्रव्यता राष्ट्रे ममानुस्मरणेन च ।
त्वयि भक्तिर्ममैवास्तु नित्यमव्यभिचारिणी ॥१९.१८ ॥

दत्तात्रेय उवाच

यत्र ते कीर्तिताः सर्वे तान् वरान् समवाप्स्यसि ।
मत्प्रसादाच्च भविता चक्रवर्ती त्वमीश्वरः ॥१९.१९ ॥

जड उवाच

प्रणिपत्य ततस्तस्मै दत्तात्रेयाय सोऽर्जुनः ।
आनाय्य प्रकृतीः सम्यगभिषेकमगृह्णत ॥१९.२० ॥

आघोषयामास तदा स्थितो राज्ये स हैहयः ।

दत्तात्रेयात् परामृद्धिमवाप्यातिबलान्वितः ॥१९.२१ ॥

अद्यप्रभृति यः शस्त्रं मामृतेऽन्यो ग्रहीष्यति ।

हन्तव्यः स मया दस्युः परिहंसारतोऽपि वा ॥१९.२२ ॥

इत्याज्ञप्तेन तद्राष्ट्रे कश्चिदायुधधृङ्नरः ।

तमृते पुरुषव्याघ्रं बभूवोरुपराक्रमः ॥१९.२३ ॥

स एव ग्रामपालोऽभूत् पशुपालः स एव च ।

क्षेत्रपालः स एवासीद् द्विजातीनाञ्च रक्षिता ॥१९.२४ ॥

तपस्विनां पालयिता सार्थपालस्तु सोऽभवत् ।

दस्यु-व्यालाग्नि-शस्त्रादि-भयेष्वब्धौ निमज्जताम् ॥१९.२५ ॥

अन्यासु चैव मग्नानामापत्सु परवीरहा ।

स एव संस्मृतः सद्यः समुद्धर्ताभवन्नृणाम् ॥१९.२६ ॥

अनष्टद्रव्यता चासीत् तस्मिन् शासति पार्थिवे ।
तेनेष्टं बहुभिर्यज्ञैः समाप्तवरदक्षिणैः ॥१९.२७ ॥

तेनैव च तपस्तप्तं संग्रामेष्वभिचेष्टितम् ।
तस्यार्धिमतिमानञ्च दृष्ट्वा प्राहाङ्गिरा मुनिः ॥१९.२८ ॥

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ।
यज्ञैर्दानैस्तपोभिर्वा संग्रामे चातिचेष्चितैः ॥१९.२९ ॥

दत्तात्रेयाद्दिन् यस्मिन् स प्रापर्धि नरेश्वरः ।
तस्मिंस्तस्मिन् दिने यागं दत्तात्रेयस्य सोऽकरोत् ॥१९.३० ॥

तत्रैव च प्रजाः सर्वास्तस्मिन्नहनि भूपतेः ।
तस्यर्धि परमां दृष्ट्वा यागं चक्रुः समाधिना ॥१९.३१ ॥

इत्येतत् तस्य माहात्म्यं दत्तात्रेयस्य धीमतः ।

विष्णोश्चराचरगुरोरनन्तस्य महात्मनः ॥१९.३२ ॥

प्रादुर्भावाः पुराणेषु कथ्यन्ते शार्ङ्गधन्विनः ।
अनन्तस्याप्रमेयस्य शङ्ख-चक्र-गदाभृतः ॥१९.३३ ॥

एतस्य परमं रूपं यश्चिन्तयति मानवः ।
स सुखी स च संसारात् समुत्तीर्णोऽचिराद्भवेत् ॥१९.३४ ॥

सदैव वैष्णवानाञ्च भक्त्याहं सुलभोऽस्मि भोः ।
इत्येवं यस्य वै वाचस्तं कथं नाश्रयेज्जनः ॥१९.३५ ॥

अधर्मस्य विनाशाय धर्माचारार्थमेव च ।
अनादिनिधनो देवः करोति स्थिति-पालनम् ॥१९.३६ ॥

तथैव जन्म चाख्यातमलर्कं कथयामि ते ।
तथा च योगः कथितो दत्तात्रेयेण तस्य वै ।
पितृभक्तस्य राजर्षेरलर्कस्य महात्मनः ॥१९.३७ ॥

इति श्रीमार्कण्डेयपुराणे दत्तात्रेयीये ऊनविंशोऽध्यायः

20(18)

विंशोऽध्यायः

जड उवाच

प्राग्बभूव महावीर्यः शत्रुजिन्नाम पार्थिवः ।
तुतोष यस्य यज्ञेषु सोमावाप्त्या पुरन्दरः ॥२०.१ ॥

तस्यात्मजो महावीर्यो बभूवारिविदारणः ।
बुद्धि-विक्रम-लावण्यैर्गुरुशक्राश्विभिः समः ॥२०.२ ॥

स समानवयो-बुद्धि-सत्त्व-विक्रम-चेष्टितैः ।

नृपपुत्रो नृपसुतैर्नित्यमास्ते समावृतः ॥२०.३ ॥

कदाचिच्छास्त्रसम्भार-विवेककृतनिश्चयः ।
कदाचित् काव्यसंलाप-गीत-नाटकसम्भवैः ॥२०.४ ॥

तथैवाक्षविनोदैश्च शस्त्रास्त्रविनयेषु च ।
योग्यानि युद्धनागाश्व-स्यन्दनाभ्यासतत्परः ॥२०.५ ॥

रेमे नरेन्द्रपुत्रोऽसौ नरेन्द्रतनयैः सह ।
यथैव हि दिवा तद्वद्रात्रवपि मुदा युतः ॥२०.६ ॥

तेषां तु क्रीडतां तत्र द्विज-भूप-विशां सुताः ।
समानवयसः प्रीत्या रन्तुमायान्त्यनेकशः ॥२०.७ ॥

कस्यचित्त्वथ कालस्य नागलोकान्महीतलम् ।
कुमारावागतौ नागौ पुत्रावश्वतरस्य तु ॥२०.८ ॥

ब्रह्मरूपप्रतिच्छन्नौ तरुणौ प्रियदर्शनौ ।
तौ तैर्नृपसुतैः सार्धं तथैवान्यैर्द्विजन्मभिः ॥२०.९ ॥

विनोदैर्विविधैस्तत्र तस्थतुः प्रीतिसंयुतौ ।
सर्व च ते नृपसुतास्ते च ब्रह्मविशां सुताः ॥२०.१० ॥

नागराजात्मजौ तौ च स्त्रानसंवाहनादिकम् ।
वस्त्रगन्धानुसयुक्तां चक्रुर्भोगभुजिक्रियाम् ॥२०.११ ॥

अहन्यहन्यनुप्राप्ते तौ च नागकुमारकौ ।
आजग्मतुर्मुदा युक्तौ प्रीत्या सूनोर्महीपतेः ॥२०.१२ ॥

स च ताभ्यां नृपसुतः परं निर्वाणमाप्तवान् ।
विनोदैर्विविधैर्हास्य-संलापादिभिरेव च ॥२०.१३ ॥

विना ताभ्यां न बुभुजे न सस्त्रौ न पपौ मधु ।
न रराम न जग्राह शास्त्राण्यात्मगुणर्धये ॥२०.१४ ॥

रसातले च तौ रात्रिं विना तेन महात्मना ।
निश्वासपरमौ नीत्वा जग्मतुस्तं दिने दिने ॥२०.१५ ॥

मर्त्यलोके परा प्रीतिर्भवतोः केन पुत्रकौ ।
सहेति पप्रच्छ पिता तावुभौ नागदारकौ ॥२०.१६ ॥

दृष्टयोरत्र पाताले बहूनि दिवसानि मे ।
दिवा रजन्यामेवोभौ पश्यामि प्रियदर्शनौ ॥२०.१७ ॥

जड उवाच

इति पित्रा स्वयं पृष्टौ प्रणिपत्य कृताञ्जली ।
प्रत्यूचतुर्महाभागावुरगाधिपतेः सुतौ ॥२०.१८ ॥

पुत्रावूचतुः

पुत्रः शत्रुजितस्तात नाम्ना ख्यात ऋतध्वजः ।
रूपवानार्जवोपेतः शूरो मानी प्रियंवदः ॥२०.१९ ॥

अनापृष्टकथो वाग्ग्मी विद्वान् मैत्रो गुणाकरः ।
मान्यमानयिता धीमान् ह्रीमान् विनयभूषणः ॥२०.२० ॥

तस्योपचारसम्प्रीति-सम्बोगापहृतं मनः ।
नागलोके भुवर्लोके न रतिं विन्दते पितः ॥२०.२१ ॥

तद्वियोगेन नस्तात ! न पातालञ्च शीतलम् ।
परितापाय तत्सङ्गादाह्लादाय रविर्दिवा ॥२०.२२ ॥

पितोवाच

पुत्रः पुण्यवतो धन्यः स यस्यैवं भविद्विधैः ।
परोक्षस्यापि गुणिभैः क्रियते गुणकीर्तनम् ॥२०.२३ ॥

सन्ति शास्त्रविदोऽशीलाः सन्ति मूर्खाः सुशीलिनः ।
शास्त्रशीले समं मन्ये पुत्रौ धन्यतरन्तु तम् ॥२०.२४ ॥

तस्य मित्रगुणान् मित्राण्यमित्राश्च पराक्रमम् ।
कथयन्ति सदा सत्सु पुत्रवांस्तेन वै पिता ॥२०.२५ ॥

तस्योपकारिणः कच्चिद् भवद्भ्यामभिवाञ्छितम् ।
किञ्चिन्निष्पादितं वत्सौ परितोषाय चेतसः ॥२०.२६ ॥

स धन्यो जीवितं तस्य तस्य जन्म सुजन्मनः ।
यस्यार्थिनो न विमुखा मित्रार्थो न च दुर्बलः ॥२०.२७ ॥

मद्गृहे यद् सुवर्णादि रत्नं वाहनमासनम् ।
यच्चान्यत् प्रीतये तस्य तद्देयमविशङ्कया ॥२०.२८ ॥

धिक् तस्य जीवितं पुंसो मित्राणामुपकारिणाम् ।
प्रतिरूपमकुर्वन् यो जीवामीत्यवगच्छति ॥२०.२९ ॥

उपकारं सुहृद्वर्गे योऽपकारञ्च शत्रुषु ।
नृमेघो वर्षति प्राज्ञास्तस्येच्छन्ति सदोन्नतिम् ॥२०.३० ॥

पुत्रावूचतुः

किं तस्य कृतकृत्यस्य कर्तुं शक्येत केनचित् ।
यस्य सर्वार्थिनो गेहे सर्वकामैः सदार्च्चिताः ॥२०.३१ ॥

यानि रत्नानि तद्गेहे पाताले तानि नः कुतः ।
वाहनासनयानानि भूषणान्यम्बराणि च ॥२०.३२ ॥

विज्ञानं तत्र यच्चास्ति तदन्यत्र न विद्यते ।

प्राज्ञानामप्यसौ तात सर्वसन्देहहृत्तमः ॥२०.३३ ॥

एकं तस्यास्ति कर्तव्यमसाध्यं तच्च नौ मतम् ।
हिरण्यगर्भ-गोविन्द-शर्वादीनीश्वरादृते ॥२०.३४ ॥

पितोवाच

पथापि श्रोतुमिच्छामि तस्य यद् कार्यमुत्तमम् ।
असाध्यमथवा साध्यं किं वासाध्यं विपश्चिताम् ॥२०.३५ ॥

देवत्वममरेशत्वं तत्पूज्यत्वञ्च मानवाः ।
प्रयान्ति वाञ्छितं वान्यद् दृढं ये व्यवसायिनः ॥२०.३६ ॥

नाविज्ञातं न चागम्यं नाप्राप्यं दिवि चेह वा ।
उद्यतानां मनुष्याणां यतचित्तेन्द्रियात्मनाम् ॥२०.३७ ॥

योजनानां सहस्राणि व्रजन् याति पितीलिकः ।
अगच्छन् वैनतेयोऽपि पादमेकं न गच्छति ॥२०.३८ ॥

क्व भूतलं क्व च ध्रौव्यं स्थानं यत् प्राप्तवान् ध्रुवः ।
उत्तानपादनृपतेः पुत्रः सन् भूमिगोचरः ॥२०.३९ ॥

तत् कथ्यतां महाभाग कार्यवान् येन पुत्रकौ ।
स भूपालसुतः साधुर्येनानृण्यं भवेत वाम् ॥२०.४० ॥

पुत्रावूचतुः

तेनाख्यातमिदं तात पूर्ववृतं महात्मना ।
कौमारके यथा तस्य वृतं सद्वृत्तशालिनः ॥२०.४१ ॥

तन्तु शत्रुजितं तात पूर्वं कश्चिद्विजोत्तमः ।
गालवोऽभ्यागमद्धीमान् गृहीत्वा तुरगोत्तमम् ॥२०.४२ ॥

प्रत्युवाच च राजानं समुपेत्याश्रमं मम ।
कोऽपि दैत्याधमो राजन् विध्वंसयति पापकृत् ॥२०.४३ ॥

तत्तद्रूपं समास्थाय सिंहेभ-वनचारिणाम् ।
अन्येषाञ्चाल्पकायानामहर्निशमकारणात् ॥२०.४४ ॥

समाधिध्यानयुक्तस्य मौनव्रतरतस्य च ।
तथा करोति विघ्नानि यथा चलति मे मनः ॥२०.४५ ॥

दग्धं कोपाग्निना सद्यः समर्थस्त्वं वयं न तु ।
दुः खार्जितस्य तपसो व्ययमिच्छामि पार्थिव ॥२०.४६ ॥

एकदा तु मया राजन्नतिनिर्विण्णचेतसा ।
तत् क्लेशितेन निश्वासो निरीक्षयासुरमुज्झितः ॥२०.४७ ॥

ततोऽम्बरतलात् सद्यः पतितोऽयं तुरङ्गमः ।

वाक् चाशरीरिणी प्राह नरनाथ शृणुष्व ताम् ॥२०.४८ ॥

अश्रान्तः सकलं भूमेर्वलयं तुरगोत्तमः ।
समर्थः क्रान्तुमर्केण तवायं प्रतिपादितः ॥२०.४९ ॥

पातालाम्बरतोयेषु न चास्य विहता गतिः ।
समस्तदिक्षु व्रजतो न भङ्गः पर्वतेष्वपि ॥२०.५० ॥

यतो भूवलयं सर्वमश्रान्तोऽयं चरिष्यति ।
अतः कुवलयो नाम्ना ख्यातिं लोके प्रयास्यति ॥२०.५१ ॥

क्लिश्यत्यहर्निशं पापो यश्च त्वां दानवाधमः ।
तमप्येनं समारुह्य द्विजश्रेष्ठ हनिष्यति ॥२०.५२ ॥

शत्रुजिन्नाम भूपालस्तस्य पुत्र ऋतध्वजः ।
प्राप्यैतदश्वरत्नञ्च ख्यातिमेतेन यास्यति ॥२०.५३ ॥

सोऽहं त्वां समनुप्राप्तस्तपसो विघ्रकारिणम् ।
तं निवारय भूपाल भागभाङ्नृपतिर्यतः ॥२०.५४ ॥

तदेतश्वरत्नं ते मया भूप निवेदितम् ।
पुत्रमाज्ञापय तथा यथा धर्मो न लुप्यते ॥२०.५५ ॥

स तस्य वचनाद्राजा तं वै पुत्रमृतध्वजम् ।
तमश्वरत्नमारोप्य कृतकौतुकमङ्गलम् ॥२०.५६ ॥

अप्रेषयत धर्मात्मा गालवेन समं तदा ।
स्वमाश्रमपदं सोऽपि तमादाय ययौ मुनिः ॥२०.५७ ॥

इति श्रीमार्कण्डेयपुराणे पिता-पुत्रसंवादे कुवलयाश्वीयोऽ नाम विंशोऽध्यायः

About this digital edition